This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

॥अथगुर्जरनागरप्रसिद्धवेदांगज्योतिषपाठभाष्यप्रारंभोयंवर्ण्णि॥

Accession No:- ~~8438~~ M1332

Title :- वेदांग ज्योतिष भाष्य

Author - शेष

Date: शके 1787

संवत् :- 1865

पे :- 10

1

KKSU LIBRARY RAMTEK 441 106 M.1332 Dist Nagpur

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वे·ज्यो·भा· ॥श्रीगणेशायनमः॥ अव्याकृताव्याकृतं यत्तदाद्यं त्र्यात्मकं शब्दराशिं विशिष्टैः
१ कालस्येदं कारणं यत्तु सारं भोगावाप्तेः साधनं संप्रणम्य॥१॥ वेदस्य कालस्य विपर्य
याद्युत्पन्नार्थमंगमाद्यं तु शास्त्रं॥ ज्योतिषं नामाकुलकं प्रधानं सोमाकरोहं विवृणो
मि शक्त्या॥२॥ लब्ध्वा ज्ञानं भ्रांतिभं बुद्धियोगान्न दृष्टं भाष्यं प्रत्ययोस्य नास्ति॥ सर्वज्ञ
ता नास्ति ममेति मत्वा ज्योतिर्विदो नम्रशिपसमूर्ध्ना॥३॥ यस्मादहं स्वप्रभावाप्रव
त्तो होरातंत्रे गणिते च प्रगल्भः॥ तस्मादस्येवस्तुसारं विदित्वा कृत्स्नार्थं स्येकृत्स्नपि
ष्यति राब्दं॥४॥ पंचसंवत्सरमयमिति॥ एतेन श्लोकद्वयेन शास्त्रकारोभिधेयभूता
मिष्टदेवतां नमस्कृत्य वस्तुप्रन्यासं करोति॥ तद्यथा॥ शुचिरहं वाङ्मनःकायपशुद्धः॥ ज्योति
षामयनं सूर्यचंद्रनक्षत्राणां गमनं वक्ष्यामि कथयिष्यामि॥ कथं॥ अनुपूर्वशः॥ यथाक्र
मेणेत्यर्थः॥ कीदृशं पुण्यं॥ यागकालविधिज्ञानतया पापापहं॥ तथा॥ संमतं॥ ब्राह्मणेंद्रा
णां॥ यजमानानामभिप्रेतं॥ एतेनैव यत्तस्येंद्रा इति श्रुतेः॥ किमर्थं॥ यज्ञकालार्थसिद्धये॥
यागचोदितकालविधानार्थमित्यर्थः॥ किं कृत्वा॥ प्रणम्य॥ नमस्कृत्य॥ कं॥ प्रजापतिं॥ स्र १

ष्टारं॥ केन॥ शिरसा उत्तमांगेन॥ कीदृशं॥ पंचसंवत्सरमयं॥ संवत्सरपरिवत्सरेदावत्सरा
नुवत्सरेद्वत्सरात्मकं॥ तथा॥ युगाध्यक्षं॥ कृत्तादीनां वैष्णववार्हस्पत्यैंद्राग्नत्वाष्ट्राहिर्बुध्न्य
पित्र्यसौरवैश्वदेववसार्पार्यमणदास्त्रभाग्यांतानांद्वादशयुगानां च स्रष्टारं॥ तथा॥ दिनर्त्वयन
मासांगं॥ कालाचयथादिभाद्योमुहूर्तकालपुरुषस्यांगानि॥ तथा सएव संवत्सरः प्रजा
॥ॐ नमो ज्योतिषे॥ हरिः ओम्॥ पंचसंवत्सरमयं युगाध्यक्षं प्रजापतिं॥ दिनर्त्वय
नमासांगं प्रणम्य शिरसा शुचिः॥१॥ ज्योतिषामयनं पुण्यं प्रवक्ष्याम्यनुपूर्वशः॥
संमतं ब्राह्मणेंद्राणां यज्ञकालार्थसिद्धये॥२॥ वेदा हि यज्ञार्थमभिप्रवृत्ताः काला
नुपूर्व्या विहिताश्च यज्ञाः॥ तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञं॥३॥
पतिः षोडशकलः॥ तस्याहोरात्रयएव पंचदशकला ध्रुवैकास्य षोडशीकलेति॥ तथा मासा
श्चार्धमासाश्चपरूंषि ह्यतवोगानि संवत्सरो महिमेति॥ एवमहं प्रवक्ष्यामीत्यर्थः॥२॥ वे
दा हि यज्ञार्थमिति॥ वेदा ऋग्वेदादयः॥ किल॥ यस्माद्यज्ञार्थमभिप्रवृत्ताः प्रागता उत्पन्नाः॥
यथार्कस्मृतिः॥ अग्निवायुरविभ्यश्च त्र्यंब्रह्म सनातनं॥ दुदोह यज्ञसिध्यर्थमृग्यजुःसाम

२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लक्षणमिति। तथा। कालानुपूर्व्याद्विहिताश्च यज्ञाः। दिनर्त्वयनेषु। यज्ञा विहिताः विभक्ताः श्रुताः। यथा। पुण्याहे दीक्षा। वसंते ज्योतिष्टोमेन यजेत। यजेत वाजपेयेन ग्रीष्मइति। तथा पंचदशाद्दीयइति। तस्माद्धि इदं कालविधानशास्त्रं। अनेनहि कालावयवा विज्ञायंते। यो ज्योतिषं वेद स वेद यज्ञं। ज्योतिःशास्त्रज्ञः। कालस्वरूपज्ञ न्याय यथोक्तयज्ञफलभाग्भवतीत्यर्थः। नवै — विदुरि — मनुष्यनक्षत्रमिति श्रुतिः। तथा। ते असुरा अयज्ञा अदक्षिणा अ यथा शिखा मयूराणां नागानां मणयो यथा॥ तद्वद्वेदांगशास्त्राणां ज्योतिषं मूर्ध्नि स्थितं॥४॥ ॥नक्षत्राय ज्ञ किंवा कुर्वततां कुसामेवाकुर्वतेति। तथा च परिशिष्टकृत्। मंत्रपाद पद संधि तो धातु नाम व वचन प्रकृतितः। ईदृग्गो भवति यज्ञविधितः। पक्षमास तिथि चंद्रगतितः॥३॥ यथा शिखेति। यथा मयूराणां शिखा चूलिका मूर्ध्नि शिरसि तिष्ठति। यथा नागानां सर्पाणां मणयो रत्नानि। तद्वद्वेदांगशास्त्राणां ज्योतिषं गणितं क्षेत्र संख्या विज्ञानं देवयजनादीनां। यथाह विष्णुः। इष्टका ग्रोषपाकाभ्यां त्रिंशन्मानानुहीयते। तक्षेत्राणि चतुर्भागं निहीने दापये स्थिरइति॥४॥ एवमधिकृत्याभिधेयमाह। माघशुक्लप्रपन्न २

स्येति। एवमिहज्योतिर्विदः कालज्ञानं तत्स्वरूपप्रतिपादनं प्रवक्षते। कथयंति। कस्य। युगस्य। कीदृशस्य। पंचवर्षस्य। संवत्सरादीनां चैकीकृत्य। यतश्च वादिमानानि वक्ष्यमाणानि सौर सावन चांद्रार्क्षाणि तेषां च यतः परस्पर वैषम्येण कालवैषम्यं। यतः। सावनस्य संवत्सरस्य प्रकृत्यैव षट्दिनानि लुप्यंते। सौरमानापेक्षया ऽब्दपंचम्यानि तानि त्वधिकमासाभ्यां पूर्यंते। यत स्तौ द्वौ युगमध्ये भवतः। ते च युगा द्वादश। वैष्णव बार्हस्पत्यैंद्राग्नत्वाष्ट्राहिर्बुध्न्य पित्र्य सौम्य वैश्वदेव सापर्यिम्ण दास्रभाग्याः। तैः षष्ट्यब्दनिष्पत्तिस्ततः काम्यं भवति।

माघशुक्लप्रपन्नस्य पौषकृष्णसमापिनः॥ युगस्य पंचवर्षाणि कालज्ञानं प्रचक्षते॥५॥

सौरमानापेक्षया तस्य कुतः प्रवृत्तिरित्याह। माघशुक्लेति। तदादि कालगणनेत्यर्थः। तथा चलौगाक्षिः। माघ्याः पौर्णमास्याश्चतुरहे पुरस्तात्संवत्सराय दीक्षंतइति। तथा च गर्गः। कालज्ञानं महत्पुण्यं कालश्चादित्य उच्यते। स च माघस्य शुक्लस्य सोमवासवयोः सह। सहोदयं श्रविष्ठाभिः प्रस्थायान्त्या सुहृच्च स्वइति। एवमेव। पौषकृष्णसमापिनः। ततस्तदातस्य समापनं नामत एव। अतः शुक्लपक्षादिकालप्रवृत्तिरिति सिद्धं भवति। यत एवमतोधिमास मन्तानां कृष्ण

(3)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वे॰ज्यो॰भा॰ पक्षादिकालमवस्यनपेक्ष्यैवमताहानुष्ठानंकुर्वंति।तथाचगर्गः।तेषांचसर्वेषांनक्षत्राणां
३ कर्मसुकृत्तिकाःप्रथममाचक्षते।श्रविष्ठानुसंख्यायाः पूर्वालग्नानांअनुराधंपश्चिमंविधानां
रोहिणीसर्वनक्षत्राणां।माघसोमर्णांभौम्यानांवार्यनक्षत्राणांसर्वासांषड्राशितानामा
दिः।श्रविष्ठाःएवंवर्षस्ययुगस्यादिर्वसंतः।ऋतूनामाघः।पक्षाणांशुक्लोऽयनानामुत्तरं।
दिवसानांशुक्लप्रतिपत्।मुहूर्त्तानांरौद्रः।करणानांकिंस्तुघ्नः।ग्रहाणांध्रुवइति।ननुकथमे
षाशातपथीश्रुतिः।यावैषाफाल्गुनीपौर्णमासीसंवत्सरस्यप्रथमारात्रिर्योत्तरासापूर्वमोत्त
मेतिमानुषाणांचविषयापेक्षयायनस्तेषांयथाचोक्तास्तिफाल्गुन्यांपौर्णमास्यामारंभ
तइति।ततोनेतेषांसत्संगीकालव्यवस्था।यस्मादघमर्षणसूक्तेअहोरात्रसूर्याचंद्रमसांयु
पुराकल्पव्यवस्थयाकालावस्थितिर्नासाविहायथार्थता।५।।स्वराक्र[illegible]मेतेसोमार्काविति
स्वर्दिवंयस्मिन्कालेआक्रमेते।व्याप्नुतः।कौ।सोमार्कौ।कस्यसार्कंसह।तथासवासवौ।
स धनिष्ठायांनक्षत्रस्यर्थः।तथाचतत्रअपंचहंतिरास्ते।तदाकिमित्याह।स्यात्तदादियुगं।
तदादियुगमारंभोभवेत्।तथातदैवमाघोमासःऋतुर्वाभवेत्।तथासएवतपोमासोभ ३

स्ये वेत्।नपश्चतपश्चेतिश्रुतौ।तथाशुक्लःपक्षइतिवाक्यशेषः।तथातदैवयस्मादुदगयनं
भवेदितिप्रतिज्ञा।ननुपद्येवं।कथंऋतूनांवसंतोजायते।आद्यस्तत्पूर्वाःसर्वाःश्रुतयइति।
उच्यते।तास्तुवर्णानांक्रमानुष्ठानाभिधायकत्वेनप्रवृत्ताः।यस्माच्छिशिरस्यैवाद्यंजन्मश्रूयते
।शिशिरोग्रेअग्नेर्जन्मेति।तस्मादग्नि[illegible]रम्भस्त्यज्यते।व्याजमाग्निजन्मयतः।स्वयमनभिव्यक्त
रूपमासीत्पश्चाच्चतेषामभिव्यक्तिंगतस्ततोस्यपश्चिमजन्मेतदित्यभिगतत्वादतएवात्रस
स्वराक्रमेतेसोमार्कौयदासाकंसवासवौ।स्यात्तदादियुगंमाघस्तपःशुक्लोयनंह्युदक्।।६।।
प्रपद्येतेश्रविष्ठादौसूर्याचंद्रमसावुदक्।।सार्पार्धेदक्षिणार्कस्तुमाघश्रावणयोःसदा।।७।।
र्ववर्णानां।।६।।प्रपद्येतेश्रविष्ठादाविति।सर्वेषुयुगेषुसूर्याचंद्रमसावुदक्प्रवृत्तिंप्रपद्येतेश्र
विष्ठादौप्रथमेंशे।तथासार्पार्धेआश्लेषामध्येग्रीष्मांते।सूर्योदक्षिणाप्रपद्यते।एवंतस्या
घर्मवृद्धिरपांप्रस्थःक्षपाह्रासउदग्गतौ।।दक्षिणेतौविपर्यासःषण्मुहूर्त्यनेनतु।।८।। ।।
यनंमाघश्रावणयोः।सर्वकालेपंचस्वपिसंवत्सरेष्वित्यर्थः।एवंभूतस्य।।७।।घर्मवृद्धिरपांप्रस्थ
इति।तस्यसूर्यस्यउदग्गतौनिमित्ते।घर्मवृद्धिर्भवतीतिवाक्यशेषः।घर्मइत्यहर्नाम।घर्मः।घ्रसः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

घृणिः।इत्यहर्नामरूपवितं।तथाक्षपाह्रासः।रात्रिः।क्षपा।श्यावी।शर्वरी।इतिरात्रिनाम
रूपवितं।तदाप्रभृतिदिनानिवर्द्धंते।रात्रिश्चापक्षीयते।एवमेवतस्यदक्षिणेतोविपर्यासः।दक्षि
णायनेदिनह्रासोरात्रिवृद्धिश्चेत्युक्तंभवति।कियतीवृद्धिरित्याह।षण्मुहूर्ती।षण्मुहूर्त्ता।त
थाचगर्गः।उदग्गतेकेषण्मासास्तपारीनार्कमानजाः।क्रमादेतद्रात्र्यः षट्संख्यादिनवृद्धि
त्तिथि।एवमयनेवृद्धिह्रासौ।तथाचसापिक्रियतीत्याह।प्रस्थः द्वात्रिंशत्पलिकमित्यर्थः।ए

प्रथमंसप्तमंचाहुरयनाद्यंत्रयोदश।।चतुर्थंदशमंचैवद्विर्युग्माद्यंबहुलेप्यृतौ।।९।।
वसुस्त्वष्टाभवोजश्चमित्रःसर्पाश्विनौजलं।।धाताकश्चायनाद्याःस्युरर्धपंचमभस्त्वृतुः।।१०।।

चंपंचानामपियुगानांसहसामान्यंलक्षणमाह।।८।।प्रथमंसप्तमंचाहुरिति।एतानिआद्यानिदिना
निर्द्दिष्टयुगानांपंचानां।कथं।प्रथमंसप्तमंचाद्यस्यमाघशुक्लप्रतिपद्दूश्रावणशुक्लसप्तमीचात
योरुदगयनदक्षिणायनेसंवत्सरस्येसाहुर्गर्गादयः।तथाद्वितीयस्यत्रयोदशंशुक्लंचतुर्थंकृष्णंए
वंतृतीये।ततोबहुलमपरपक्षः।कथंप्रतिपदादिर्द्दिष्टइत्यर्थः।एतेनुत्तरस्मिन्श्लोकेस्फुटतरंगर्ग
वाक्यैःप्रतिपादयिष्यामः।।९।।वसुस्त्वष्टाभवोजश्चेति।वसुर्धनिष्ठादेवतोपलक्षिता।एवंत्वष्टा ४

चित्रा।भवोरुद्रआर्द्रा।अजःपूर्वप्रोष्ठपदाः।मित्रःअनुराधा।सर्पआश्लेषा।अश्विनावश्वयु
क्।जलंपूर्वाषाढा।धाताउत्तराफाल्गुनी।धातार्यमेतिमंत्रवर्णात्।कःरोहिणी।एवमेतेऋक्षाः
एतेनैवक्रमेणायनाद्याःस्युर्भवेयुः।एवमप्यर्धपंचमभस्त्वृतुः।ऋतोऋतौसार्धाश्चत्वारःऋ
क्षाभवंति।वक्ष्यमाणनक्षत्रैर्आद्यैः।एतस्मिन्नर्थेप्रतिपत्त्यर्थंविस्तरेणाहगर्गः।तद्यथा।अय
नान्यृतवोमासाःपक्षास्त्वृक्षंतिथिर्दिनं।।नत्वतोनाधिगम्यंतेयदाब्दोनाधिगम्यते।।१।।यदा
तुनत्वतोब्दस्यक्रियतेधिगमोबुधैः।।तदैवैषाममोरुःस्याक्रियाणांचापिसर्वशः।।२।।तस्मात्
संवत्सराणांतुपंचानांलक्षणमिच।।कर्माणिचयथाकुलेनदैवतानिचवक्ष्यति।।३।।यदामाघ
स्यशुक्लस्यप्रतिपद्युत्तरायणं।।सहोदयंश्रविष्ठाभिःसोमार्कौप्रतिपद्यतः।।४।।तदानभस्ससप्त
म्यांक्रियतेदक्षिणायनं।।सार्पार्द्धेकुरुतेयुक्तिंचित्रायुक्तेनिशाकरे।।५।।प्रथमःसोग्निर्दैवत्यो
नाम्नासंवत्सरःस्मृतः।।यदामाघस्यशुक्लस्यत्रयोदश्यामुदग्रविः।।६।।युक्तेचंद्रमसारौद्रेसम
त्वंप्रतिपद्यते।।चतुर्थ्यांनभसःकृष्णेतदार्कोदक्षिणायनं।।७।।सार्पार्धेकुरुतेसूर्यस्त्वजयुक्ते
निशाकरे।।द्वितीयश्चार्कदैवत्यःसनाम्नापरिवत्सरः।।८।।कृष्णेमाघस्यदशमींवासवा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वे॰ज्यो॰भा॰ रोर्दिवाकरः॥उदीचीं दिशमातिष्ठेन्मैत्रस्यैकुलघ्नेजसि॥९॥नभसश्चनिवर्त्तेतिशुक्रस्यप्रथ
५ मेतिथौ॥चंद्रार्काभ्यांसार्पयुग्भ्यांसार्पस्यार्धेद्युगस्यतु॥१०॥नराततीयंतंप्राहुरिहासंवत्सरंज
नाः॥सप्तम्यांमाघशुक्लस्यवासवाहोदिवाकरः॥११॥व्रजेतयाम्यांशुक्रस्यश्रावणस्यत्रयोदशीं
॥चतुर्थमिंदुदेवसमाहुः शुद्धंतुवत्सरं॥१२॥फाल्गुनीमुत्तरांप्राप्तेसोमेसूर्येचवासवे॥यद्युत्तराय
णंकृष्णेचतुर्थ्यांतिपसोभवेत्॥१३॥श्रावणस्यचकृष्णस्यसार्पार्धेद्युमीपुनः॥रोहिणीसहितो
सोमेरवेःस्याद्दक्षिणायनं॥१४॥इद्वत्सरःसविज्ञेयःपंचमोमत्युदैवतः॥एवमेतद्द्विजानीयात्पंच
वर्षस्यलक्षणं॥१५॥दृष्ट्वास्वरूपंयुक्तस्यतद्वर्षमितिनिर्दिशेदिति॥अर्धपंचमभस्त्वतुरितीह
प्रतित्ता॥यस्माहृतुसंख्यायांविप्रतिपत्तिराचार्याणां॥पंचर्तवःसंवत्सरस्येतिचब्राह्मणं॥तं
थागर्गस्त्वपक्षतवदत्याह॥कृष्मात्रेयःषड्दृष्टोतिनारदः॥चतुर्विंशतिरित्याहभागुरिः
त्रीणित्रातानिसपटषष्टीनीत्याहक्रौष्टुकिः॥१०॥एकांतरेन्हिमासेचेति॥पुनरेकांतरेन्हि
यस्मिन्नहनिसूर्यसंक्रमणंतस्मादन्हस्तृतीयेन्हिऋतुरन्योभवतीतिवाक्यशेषः॥कथं॥मा
सेचमासमतिक्रम्यतंद्वितीयंतृतीयमितितस्मादर्धपंचमभस्त्वतुरितिह्यवेवोक्तौतस्मात् ५

भचोदनमप्याह॥पूर्वान्हृत्वादिरुत्तरः॥उत्तरःआर्द्रादिर्वक्ष्यमाणऋक्षः॥सएकांतरेन्हि
मासेचापिभवेत्ततआश्विसुपरक्षितमाश्वयुज्यांततएकमतिक्रम्यांतरेणकृत्तिकाकार्त्तिकी
भवेदुत्तरमेव॥अथान्योवाऋतुः॥एकांतरेचदिनेचमासेचैवमतावन्यस्मिन्कथंपूर्वास्तिजावा
दीन्यंचपूर्वान्हृत्वाअतिक्रम्येत्यर्थः॥क्षपंचपर्वणांपक्षाणामार्धसंधीनांवक्ष्यमाणांशकल्पन
यामध्येऋक्षांशास्ततआर्द्रादिश्चोदितादृभवति॥भरण्यादयःषष्ठांतराःपर्वस्तूयागदिवसेष्विसु
क्तंभवति॥तेचपुनरेकांतरेन्हिमासेचपोर्यापर्येणभवंति॥तद्यथा॥अमत्रहाश्विनीततःपुनःषड्विंशं
एकांतरेन्हिमासेचपूर्वान्हृत्वादिरुत्तरः॥अर्धपोःपंचपर्वणांमदूपंचदशासमो॥११॥
न्हिपंचविंशेवाभवेत्॥तथाचगर्गः॥यावतात्वेककालेनभवर्गस्त्रिणवात्मकं॥भुंक्तेचंद्रःसआ
र्षेभासस्तस्यार्धपक्षउच्यते॥यतश्चत्वारिमानानितानितुगर्गयाकेर्दर्शयिष्यामः॥तद्यथा॥
सावनंवापिसौरंवाचांद्रंनाक्षत्रमेवच॥चत्वार्येतानिमानानियेयुगंप्रविभज्यते॥१॥अहो
रात्रात्मकंलोकंयमानंचसावनंस्मृतं॥अतश्चैतानिमानानिप्रकृतानीहसावनात्॥२॥ततः
सिद्धान्यहोरात्राण्युदयाश्चाप्यथार्कजाः॥त्रिंशच्चाष्टादशाशती१८३०दिनानांचयुगेस्मृता॥३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

6

मासस्त्रिंशदहोरात्राः पक्षोर्धं १५ सावनं स्मृतं ॥ अहोरात्रलवानां तु चतुर्विंशच्छतात्मकं २४००
॥४॥ सौरं सूर्येण संभूतं परिसर्पति भास्करे ॥ यावता द्युत्तरां काष्ठां गच्छति दक्षिणां ॥५॥ कालेन
सोब्दस्तस्यार्धमयनं तु ऋतुत्रयं ॥ ऋतोरर्धं भवेन्मासस्त्रिंशद्भागदिनार्कजः ॥६॥ तस्यार्धमर्कजः पक्षः
स्तस्मात्पंचदशं दिनं ॥ शतं लवानां षड्विंशं लवाः पंचदशास्तथा ॥७॥ पतिश्चाष्टादशान्तं युगमार्कैर्दि
नैः स्मृतं ॥ वृद्धिक्षयाभ्यां संभूतं चांद्रमासं हि चंद्रमाः ॥८॥ लवं लवमथोनेन सावनेन निशाकरः ॥ क्ष
यं वृद्धिमवाप्नोति स चांद्रो मास उच्यते ॥९॥ तस्यार्धं पर्वणः पक्षस्तस्मात्संचरती तिथिः ॥ प्रमाणेन
लवानां तु द्वाविंशं न्यूनमुच्यते ॥१०॥ सोमस्याष्टादशाद्यानी युगे षष्ट्यधिका स्मृता ॥ यावतानेन का
लेन भवर्गं त्रिणवात्मकं ॥११॥ आर्क्षात्पक्षात्संचरतां नाक्षत्रं दिनमुच्यते ॥ प्रमाणेन लवानां तु द्वा
त्रिंशं शतमुच्यते ॥१२॥ नाम्ना सप्तषष्ट्या तु योजनं वास्मात्परो बलः ॥ दशोत्तरे द्वे सहस्रे युगमार्क्षै
र्दिनं स्मृतं ॥१३॥ इति ॥ एतदुत्तरप्रतिपत्त्यर्थमभिधिनो दाहृतं ॥ यस्मादेतदेवाभिप्रेयेदं शास्त्रं प्रव
त्तं वक्ष्यति चोदयावासयस्त्वसुरिति ॥ एतेनोत्तरमन्यदूहितं न्याय्यते तेषां वक्ष्यमाणानां स्वरूपं वद
न्नाह[illegible]ष्टमावनुराधा तिष्यं च ॥ अनुराधा चतुस्तारं सुदेमित्रो त्रैरेवतमिति गर्गः ॥ एतत्स्वरूपं सत्व

नं क्रूराण्युग्राणि च वक्ष्यति यस्माद्रेवतं तस्मात् ॥१४॥ दुहेयं पर्व चेत्पाद इति ॥ पर्वार्धमासः ॥ यथा
हनैरुक्तः ॥ अर्धमासः पर्व देवानस्मिन्प्रीणंतीति वचनात् ॥ तच्चेद्यदि दुहेयं गार्ग्योक्तिल्वादिकल्प
नया अधिकमासार्थं यच्छिष्यते तत्संख्यायैकत्र प्रकल्पयेत् ॥ यथाह गर्गः ॥ ततः प्रक्षीयमा
णस्य तिथिरिस्सेव संज्ञिता ॥ द्विलवोनमहोरात्रं सोमस्य गतिरुत्तमेति ॥ एतद्दूनं किय द्वेदिस्या
ह ॥ पाद इति ॥ तस्य प्रतीत्तमित्याह ॥ पादस्त्रिंशत्तु सैकिका नाडिकेति वाक्यशेषः ॥ तत्राधिकमा
सनिष्पत्तिः ॥ यथाह गर्गः ॥ द्विलवक्षयसंभूता द्वाषष्टिभवते तिथिः ॥ ऋतोरंतमनुप्राप्य कीनंरा
दुहेयं पर्व चेत्पादे पादस्त्रिंशत्तु सैकिका ॥ भागात्मनापचज्यांशान्निर्दिशेत्सोधिकोयदि ॥१३॥
त्रेति नाभतत् ॥ यस्मात्तस्माद्दतावन्मात्रार्धमासस्यान्तो ह्रसते ॥ तस्य भागात्मनापवज्यांशान्नि
र्दिशेत् ॥ संकलितं व्यवस्यायैकत्र संकल्पयेदंशं लवानां कुतः ॥ ततस्तदधिकदिनानां ॥ द्युसत्वा
दिति वाक्यशेषः ॥ तदेतत्कल्पयेदिति ॥ एवं तूक्तभागानां विसूचितानां उत्तरत्र वक्ष्यमाणानां
अंशानां ॥१२॥ निरेकं द्वादशाभ्यस्तमिति ॥ अर्थयोः पंचपर्वाणामिस्येवं जावाद्युक्तं पत्रमरु
तं ॥ यस्मिन्पर्वणि तस्मिन्वक्ष्यमाणे चोदनया नयेत् ॥ यद्येकस्तद्द्वादश ॥ यदि द्वौ तदा चतुर्विंशतिः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वे·ज्यो·भा· यदि त्रयस्तदा षड्विंशत् । ततस्तदेतद्द्विगुणं कुर्यात् । आपः सुगाः कूरैतोपश्चत्वारः कृतमापानामि
७ तिश्चतेः । चत्वारस्तदुपरिभवस्य यस्तनस्तेषामेव षष्ट्या षष्ट्या सुतं द्वाभ्यां तदुपर्यन्यद्वाभ्यां षष्टिर्द्वि
षष्टिद्र्भवंति । एवमेतत् सर्वतरैकीकृत्य यावद्भवति स पर्वणां याग कर्मणि राशिरुच्यते । ज्योतिर्वि-
द्भिरोपचस्तदावासमासेः । एतदुक्तं भवति । द्यंशस्य चोदितस्य जावादीनां मध्यात् कृतस्य न भवति १०
नाडिकाः पर्वकालराशिः । त्र्यंशस्य चतुर्दशाधिकं शतं । ११४ । चतुरंशस्य षड्त्रिंश्। १३६ दधिकं शतं
निरेकं द्वादशाभ्यस्तं द्विगुणं चाप्य संयुतं । षष्ट्या षष्ट्या सुतं द्वाभ्यां पर्वणां राशिरुच्यते । ।१३। ।
। तस्य राशेः पर्वसंधिकालात् पूर्वं पंचदश्या उत्तरार्धं कार्यं उत्तरं प्रतिपदि स्यागाय । एवं ह्येष पर्वरा-
बा शिः पौर्णमास एव । पर्वस्येंदुसंबंधात् । अमावास्यात् परिशिष्टस्य से कादशभिरभ्यसेत् इति सूर्यसंबंधे
नांतरल कृष्णाभ्येत एवमुभयमेतत् तुराकाकुहूकालगत इति चोदितेन तत्वात्तु वादिनापि किं-
चित्संगतं विशेषमुत्तरत्र कृष्णविधाने दर्शयिष्यामः । ।१३। । स्तुः पादोर्धमिति । एवं जावादिचो-
दितानां कृष्णाणां एकैकस्मिन्पंच पंच चोदिता क्रमश्चता स्त्रिणवकृष्णा सुभर्वेषु । कीदृशः
पर्वसंमिताः । चोदितपर्वर्क्षसदृशा इत्यर्थः । किमेतत्पर्यन्ते । अन्यदपि किं । पादः । पः पंचदश्याः ७

पश्चिमो दिनभाग उपवसतीयः सोमः सोपि भवेत् । तथाध्वमपि यः पर्वभावि राशेरुत्तरार्धवि
भागः सोपि तथैव भवेदित्यर्थः । किमेकवारं नहि त्रिः । त्रिवारान्नहि पंचवर्षाणि योनः पुन्येनेत्यर्थः
। तथैवापि त्रिपद्यायाः त्रिपादोपलक्षितायाः प्रतिपदः आद्याः प्रतिपदस्त्रय इति यदुक्तं तदपि भ-
वेत् । किमेवं सर्व आहुः नएकेनकः कृतेस्थितिं । अन्होदिवसमानस्यैवं कृते कल्पनायामेतां स्थितिं
व्यवस्थामाहुर्नसर्वे । अन्ये तु जावाद्यर्क्षव्यवस्थापंचस्वपि एकमाहुस्त्रिण इति स्यष्टांतत्संबंधि बा
नीयस्येत्यर्थः । तस्य तत्र । ।१४। । भांशाः स्युरिति । भमृक्षो जावादिस्तस्य अंशाः स्युर्भर्वेषुः । च
स्युः पादोर्धं त्रिपद्याया स्त्रिर्द्व्येकेनकः कृतेस्थितिं । । साम्येते द्वौस्तणेन्येतु पंचकाः पर्वसंमिताः १४
भांशास्युरष्टकाः कार्याः पक्षा द्वादशकोद्गताः । । एकादशगुणश्चोनः शुक्लेर्धं चैदवा पदि । ।१५। ।
त्वारः त्रयः द्वौ वा ते ष्टकाः कार्याः अष्टनाडिका इत्यर्थः । एवं सामान्यव्यवस्था एवमेव । यागकाला-
पेक्षया कृत्स्नानां ततो व्याप्तिः । तेषामन्यथैवोपरिष्टाद्दृश्यति । स स तत्कुंभयुक्तो मइति द्विरष्टकावा
इति पाठः दिवसाष्टभागा इत्यर्थः । तथापि पक्षा द्वादशकोद्गताः द्वादशदिवसाभ्यधिकाः सार्धा
स्त्रयोदशायविं सर्वेन आर्षपाकृत्स्नप्रमाणभेदविधानात् । यतो जावादिमे पंच चोदितास्तदा-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्थितानिपंचपर्वाण्यतिक्रम्यतराचेदानीतश्चषष्टितमेन्हिइस्यंनेचभवति।एवमेषार्षीव्याप्तिः
पांचवर्षिक्युक्तेकेनमपत्नेनेतितस्मादेवंचोदना।किंच।एकादशगुणश्चैतेयदिपक्षाद्भागस्तदैका
दशगुणोभवेत्।एकादशदिवसइत्यर्थः।शुक्लेर्धंभवेदितिवाक्यशेषः।यदिशुक्लपक्षस्तदार्धंभवेत्
मासस्येतिवाक्यशेषः।एवमेदंवायदि।यदिचांद्रोमासोभिप्रेतस्तदातिथिसंख्यायाः पूर्वपक्षादि
चोदनासावनस्तोदाएणंततएवव्यवस्था॥१५॥नवकैरिति।सप्तदशिशः पक्षयोरर्धमासयोर्नवके
नवकैरुद्धृतोंशः स्यादूनः सप्तगुणोभवेत्॥आवापस्त्वयुजेद्वौस्यात्पौलस्येस्तंगतेपरे॥१६॥
रुद्धृतोंशः स्यान्नवनाडिकाइत्यर्थः।तेरूनः सप्तगुणोभवेत्।सप्तनाडिकाइत्यर्थः।आवापस्त्व
युजेद्वौस्यात्।यदिसरूक्षोद्वावंशौक्षोभवेत्।यदात्वयुजेप्रथमश्रावणेविकारः स्यात्।कला
एकोनविंशतिः।वक्ष्यमाणस्तत्राद्वौकुर्यात्।काञ्जापेक्षयापरमांशद्वितीयंपौलस्त्ये।पुरस्ताच्चं
द्रमाअभ्युदियादियादितिश्रुतेः।पौलस्ते चंद्रमस्यस्तंगतेद्वितीयमंशंकल्पयेदृश्यतिवाक्या
र्थः।ज्ञेपप्रथमउपवसनीयोपञनीयइत्यर्थः।एवमत्र॥१६॥जावाद्यंशैरिति।वक्ष्यमाणज्ञा
वादिकमक्षमंशैरवयवैः समंविद्यात्।एतदुक्तंभवति।यमेकंचोदयिष्यतिज्ञोद्भागइत्येवं ८

समंविद्यात्।जानीयात्।तदयेनाक्षरेणतद्देवताकेनवाचोदितस्तस्यतावतोंशाभवंति।जावि
साश्वयुजेचवारः।दाचेइतिद्वौ।तदुत्तरस्मिन्निर्देशेवक्ष्यामः।तेषांपूर्वार्धे।पर्वस्कउत्तराअंशाः
कायाः।औपवस्थ्येयदातेःपंचदशीसमग्राप्यतेतदाभानंस्याच्चतुर्दश्यांतदास्तस्यापूर्वं
चतुर्दशीशेषेप्रसेत।कदैतत्।द्विभागेभ्योधिकोयदि।यदिसरूक्षस्तस्मशश्चतुर्दशीवाभवेत्।
एतदेवाभिप्रेत्यैकादशीसादिगणनादाकाकूहूरित्यादिनाज्योतिर्विद्भिःकल्पिता।तथाचपरि
शिष्टवित्।अर्धेचतुर्दशीपरतःपंचदशीयदिचतुर्दश्युपवसानंतुपितृयज्ञंतुकारयेतइति।तथाचग
जावाद्यंशैः समंविद्यात्पूर्वार्धेपर्वसूत्तराः॥भादानंस्याच्चतुर्दश्यांद्विभागेभ्योधिकोयदि॥१७
र्गः।चतुर्दश्यांयदाकृष्णोक्षयेमभ्येतिचंद्रमाः॥दृशाभवतिचाप्युच्चः सिनीवालीततस्तदेति।अ
मावास्यामदृष्टेपिससोमेप्राधान्यकरणालिंकिचिदिदृष्टेनिदृष्टेपिकेपिकेचित्तेयेगताध्वनिनिश्चु
द्धृतोथवाप्युच्चोअस्तंवाप्युपगच्छति।ततः एतौहोतरकार्यंचेंद्रवनाङ्गवेदिति।एतत्सर्वंसत्र
कारापेक्षं।एकांवैकल्यापेक्षंचोत्तरत्रह्रासदर्शनेपर्यांध्रुवंध्रुवांपौर्णमासीमुत्तरांचोपव
सेदित्यादि।एतेनजायतेचतुर्दशीपंचदश्यौ।यापूर्वापौर्णमासीसानुमतिरित्यादौविवा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षितेन पंचदशी प्रतिपदौ। एवं तु दाक्षायणयज्ञसिद्धः। एवं पूर्वं कृत्वा उत्तरां संचोदितां समप्रतिपत्सा
प्रतिपदादौ यागः। न दति क्रमे कालस्याग्नेयमेवाग्नेयपथिकृतं कुर्यादिति चोदनापूर्वापरावस्थस्तु
रितेष्टिरिति। एवमेतत्स्कृ विदितं कृत्वा पस्थानादिस्वकाले कार्यम्। पूर्वां पौर्णमासीमुपवसेदिति
यथा चोदितमन्यात्तु दोषः। यथाह श्रुतिः। ते असुरा अपयज्ञा अदक्षिणा अनक्षत्रा अदर्शमपौ
र्णमासमनाग्रयणमतिथिवर्जितं चाहुतमवेश्वदेवमश्रद्धया विधानाहुतमाससमाप्तमस्य लो
के हिनस्तीति। तस्मादुभयसंभवे येन चतुर्दशीमुपावसजंतिते निष्फलमामनायागं कृत्वा प्रजा
जौद्राग: स्वाश्वेहिरोषाविन्मूषण्यः स्माधाणः। रेमग्घाः स्वापोजः कृष्णहज्येष्ठाश्लक्षालिंगैः१८
नाम हांतं दोषं जनयंति। यथाह स्मृतिः। दुरिष्टेर्दुरथीतैश्च दुराचारैर्दुरागमैः। विमाणां कर्मदोषस्तैः
प्रजानां जायते भयं। तस्मादुभयकालसंरक्षणीयेदं ज्योतिः शास्त्रं महर्षिणाम्नातं। अत्र पंचा
नामपि वर्षाणां मासद्वयचोदनायामेकमेकमक्षं चतुर्भिरंतरावर्त्तमानैः सहितं निदर्शयति। यु
गपद्दस्य सद्भूदेवतद्यथा॥१७॥ जौद्राग: स्वाश्वेहिरोषेति। सप्तविंशतिभिरक्षरैर्नामदेवताव
यवभूतैर्नक्षत्राणि तेषामवयवास्तेषां क्रमस्तस्य चक्रल्याव्यवस्था तथा। कृत्स्नेनैनक्षत्रस्य यु १

गस्याधिमासासंभवस्तूत्तरनक्षत्रसामान्यान्येतानि दशैवोद्धृत्य चोदितानि भवंतीति वा
क्यशेषः। तेषां संख्याद्योतनार्थं स्थाननियमार्थं चैवं निर्देशाः। यस्य योदाक्षरं यसंख्याकं प्रति
पदादौ भवति। पूर्वपंचदशपते यरिद्दीनदशो भोविभज्यो। यथा द्यशमाद्ग्रद्धेति चोदितो। एवं सर्वाणि
द्व्यक्षरचोदितानि त्र्यक्षराणां तु चोदिताक्षरनिर्दिष्टांशः प्रतिपदादौ स्यादिद्वितीयः तदाप: पंचद
श्यं ते ह्वाद्युत्तरे यथा येति चोदितास्श्लेषान्तनीयेतु चोदितौ द्वौ पूर्वउत्तरः प्रतिपदि। यथाण्यरत्निभ
रणी। यदि चतुरंशास्तदा चोदितोंशः प्रतिपदादौ त्रयः पूर्वं यथा। जाविस्यश्वयुजोपलक्षिताश्वि
नी एतदर्थं भादानं चेच्चतुर्दश्यामिष्फत्तं भवंति तु पूर्वावधिपर्वस्तूत्तरा भ्रतिवचनात्संख्याक्षरं चो
दितानां पूर्वाक्षरचोदितानां तु प्रथमोंशः पंचदश्यंते शिष्टाः प्रतिपदि यावंतो भवेयुः। यथा रो
हिणी एवमन्येषां सर्वेषां। अथवा सैव प्रतिपदादौ चोदिता रोहत्या रिक्तो भवेत्। तदा तु न नववा
सः पंचदश्यां तु नवकेरुद्ध तोंशइति विधानात्। अथैषा चोदना। अथवा दर्शनिप्रधानाच्चैव वा तेषां
तत्र पूर्वाक्षरचोदितापेक्षया एवं जाविस्याश्विन्यान्नेन निर्देशं पर्वे तरेषामपि देवतोपलक्षितानां त
योपलक्षिता आश्वयुज्यादौ यागकालस्तस्मिन्सत्यसत्यपि यातत: प्रभृति पंचवर्षाणि सेवव्यव।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्याकर्तुमावत्तत्रतुअष्टत्रिंशतंशतंपर्वराशिर्भवतिततोर्धभागेनैकोनसप्ततिः६९पूर्णताहस्तमे
विहायपर्वएकोनसप्ततिःतदस्यानाडिकायागकालः।एवमेषांचतुरंशानांअवस्था।एषेवतदुत्तराणां
चतुर्णामन्येषांपर्वणां।व्यवस्थेसेकुआहुर्यस्मादेतदर्थमेवान्यानिचत्वारिनक्षत्राण्यंततरानो
क्तानि।अन्येत्वाहुर्यस्मात्पंचानामपिपर्वणांएकेनैवप्रयत्नेनसकृदेवव्यवस्थाप्यते।एके
नैवपर्वसंग्रहेणतस्मादस्यपाव्यवस्थासातस्यमुख्यपावत्सास्वचोदितेतिभवति।अन्यत्र
गौणी।तस्मात्सर्वैर्ऋचोदिताव्यवस्थेत्यन्येषांव्यवस्थामाहुः।एवमुत्तरेषामपिअंतर्दधिमा
सोपलक्षणंकृत्तिकादीनांनियतग्रहणंयस्तेपापलक्षितकार्त्तिकः।कालश्चोदनायामनिर्दि
ष्टानांभरण्यादीनामपरपक्षपंचदशीशुक्लावामित्तृतीयाएवमन्येषांएवमेतेनैवैकेनानि
र्देशेनपंचवर्षाणिगम्यंते।द्व्यादी।द्वावंशौमार्गशीर्ष्यांमुक्तप्रायमन्यत्।गइतिभागदेवतो
पलक्षितापूर्वफाल्गुनी।तस्याद्वावंशौउक्ताअवस्थासातुफाल्गुन्यां।खेतिविशाखात्र
योंशावैशाखाउक्ताव्यवस्था।श्वइतिविश्वेदेवास्तदुपलक्षितोत्तराषाढासाआषाढ्या
स्तस्याश्चदगस्यन्यक्षयांप्राकल्पनाश्चत्वारोंशोवा।एवमेवहीत्यहिर्बुध्न्योपलक्षितोत्तरप्रो १०

णयइतिभरणीत्रयोंशाः।ज्येष्ठांततीयवर्षादित्वितिपुनर्वसुश्चतुरंशः।३

ष्ठपदा।रोइतिरोहिणीत्र्यंशाद्वितीयेवर्षेस्ततःपंचपर्वाण्यतिक्रम्याधिकमासकल्पनार्थेकालप्र
त्यासःसाकार्त्तिक्यां।षेत्यश्लेषात्र्यंशाइति।चिदितिचित्रातथाचैत्र्यांद्वौ।मूइतिमूलेद्वौ।षेतिशा
तभिषक्चतुरंशं।अधिमासापेक्षा।मेत्यर्यमोपलक्षितोत्तरफाल्गुनीत्र्यंशा।तथैवधेत्यनुराधाच
तुरंशकल्पना।णइतिश्रवणं।तथैवरेइतिरेवति।चतुर्थेसंवत्सरेप्रथमंत्र्यंशं।मृगितिमृगशिरा
श्चतुरंशं।तथैवाघेतिमघाद्व्यंशं।तथैवचहइतिहस्तद्व्यंशं।ज्येइतिज्येष्ठातथैवाधिकमासापेक्ष
यानियमः।ष्ठाइतिधनिष्ठा।श्रावण्यांतेत्र्यंशं।एवमेभिःस्वर्यमाणैःऋक्षैर्यागकालःप्रकल्प्यः।
एवमेवत्वमृक्षचंद्रगत्यपेक्षया।अथवैतत्तुऋक्षंचोदनायामुत्तरोत्तरषष्टिसंख्याक्रमेणेहाहृताद्वि
पौनःपुनःषष्टितमासात्।गेतितस्मादेवस्यैवसर्वेतस्मात्तेवेचसंख्यायाःपर्वतस्ततोपिप्रकल्प्याः।
एवंतुद्विमासांतरचोदनायाःपूर्वचोदनायैवअवस्था।पौषमासस्यपौर्णमासीयतःपंचानामृतवस्त्रं
त्रात्सर्वर्क्षाश्वसप्तविंशतिः।तस्मादर्धपंचमभकल्पनायैवसर्वेप्रत्येतव्याः।तस्मादेवंसर्वएवप्र
वृत्यंतेस्यमासोपलक्षकाश्चापिभरण्याद्यास्तस्मादेवकालसाम्यएवमेतेषां॥१८॥कामभिं
शाइति।तेषामक्षाणांयेपंचदशपादेस्थानेउक्तास्तेष्टकाःकार्यअष्टनाडिकाइत्यर्थः।उक्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मेतद्विशेषार्थंपुनरुच्यते। विशेषस्तुकलाएकान्नविंशातिरधिकाउद्दुपेदशाविति वाक्यशेषः
तथाऋतुयाजीवाअन्पश्चात्तुमास्यपाजीनितथातामेवचोदितां गणनामभिप्रेत्सलौगाक्षिणा
तान्येवपंचवार्षिकाण्याम्नातानि संवत्सरस्यषडुहेतिरिव्यतद्भसाहियथा। तस्मात्पंचानांवर्षाणा
मेकएवमयत्नः। एवमत्रतिथिचोदनामाह। तिथिमेकादशाभ्यस्तामिति। पर्वचोदितांतिथिमे
कादशाभ्यस्तांपंचदशीमेकादशभिर्गुणितांसंगुण्यपंचषष्ठंशतंभवति। विभज्यभसमूहेनसप्त
विंशत्याभागमपहृत्यत्रीण्येवशिष्यंते। एवंपुनस्तत्रीयंपर्वर्क्षंतस्माद्भवति। मायुक्तादेकान्तरे।

कार्यभांशाष्टकास्थानेकलाएकान्नविंशतिः। ऊनस्थानेद्विसप्ततिमुद्धरेयुक्तसंभवे॥१९॥

न्हीतिप्रदुक्तं। अथवातिथिपरिमाणमुत्तरश्लोकेवक्ष्यतितास्तु सप्तगुणां तिथिमिति। एवंतिथेः
सप्तावयवास्तानेकादशाभिर्गुणयेत्। सप्तसप्ततिर्भवंति। ततः पर्वभांशसमन्वितांकुर्यादिति
वाक्यशेषः। एतदुक्तंभवति। तिथ्यवयवेषूपरिपर्वनक्षत्रावयवान्विन्यसेत्। द्वैवात्रिंन्वाचतुरो
वातएकोनाशीतिरशीतिरेकाशीतिर्वाभिर्वंतिततस्तान्विभज्यभसमूहेनभसमूहेकृक्षेजातंस
प्तविंशातिः। तेनभागमपहृत्यपंचविंशंषड्विंशंसप्तविंशंयानक्षत्रंतस्मिन्नहनितिथिनक्षत्रमा ११

दिशेत्। कथयेदित्यर्थः। साचसंख्यापर्वभांशसमन्वितमितिवचनात्तस्मादेवनक्षत्रादारभ्यप्रव
र्तते। नाश्विन्यादिः। एवंतुयेनयोमासउपलक्षितोनस्तस्मिंस्तस्माद्देवगणनामधर्तते। तन्नक्षत्रेषुस
र्वेषुस्फुटतराप्रवृत्तिर्भवति। यत्तुस्तथाउपलक्षितंनक्षत्रंनियमेनसर्वकालंभवति। यदिस्येवंस
र्वासांतिथीनांनक्षत्रानयनमिच्छेत्तदानष्टकालानयनान्यानिकरणान्यनुसृत्योहापोहाभ्यांक
ल्पयेदस्याकृत्स्नत्वात्तंतेहोपकारकृत्। यस्माद्धिपर्वचोदनयापक्षद्वयचोदनेयागकालएवप्रकृ
तः तस्माद्देवोच्यते॥१९॥ एवमत्रचोदितायास्तिथेःपरिमाणमाह। याः पर्वभादानकलाइति। याः।

याःपर्वभादानकलास्तास्तुसप्तगुणांतिथिं। उक्तास्तासांविजानीयात्तिथिभादानिकाः कलाः॥२०॥

पूर्वमुक्ताः कथिताः पर्वभादानकलाः भांशाः सुरष्टकाः कार्याइतिसप्तनवकोवावाचायद्विनेह।
विवक्षितंतिथीनामहत्वात्कलापरिमाणमुपरिष्टाद्वक्ष्यति। पर्वणांसाञ्चतुःपादीकाष्टानांचै
वताःकलाइति। किंतासामित्याह। तास्तुसप्तगुणांतिथिंकल्पयेदितिवाक्यशेषः। एतदु
क्तंभवति। पर्वभांशसमन्वितेदर्शैः सप्तभिस्तिथिपरिमाणंकल्पयेत्। सप्तांशगातिथिर्भव
तीत्यर्थः। यतएवमतस्तासामपिकारणभूतानांसम्यक्विजानीयात्। कास्तिथिभादा।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निकाः कलायाः पूर्वं चोदिताः।पूर्वार्धे पर्वसूत्तरार्धस्याद्वे तिथिभाहानिकाः कलाः।तस्यां तिथौ
वर्षनक्षत्रकल्पनात स्यामेव भवेदित्यर्थः।पूर्वं पूर्णमास्यां तदंशा चोदितयागकालकल्पनयोपव
सथादिकार्यमित्यर्थः।तस्यापरपक्षार्थमाह।।२०।।अतीतेति।ये पौर्णमास्यां पर्वर्क्षभागा उक्ताः
।द्वौ त्रयश्चत्वारो याषोडशाश्चतुर्विंशतिर्द्वात्रिंशद्वा तेभ्यः शोधयेत्।पातयेत्।द्विगुणां तिथिं।
द्वौ सप्तकौ चतुर्दश इत्यर्थः।ततः किं।तेषु मंडलभागेषु भानां यावत्संख्याकेषु तिथिनिष्ठां गतो र
अतीतपर्वभागेभ्यः शोधयेद्द्विगुणां तिथिं।तेषु मंडलभागेषु तिथिनिष्ठां गतो रविः।।२१।।
विषुवंतं द्विरभ्यस्तं रूपोनं षड्गुणीकृतं।पक्षा यदर्धं पक्षाणां तिथिः स विषुवान्स्मृतः।।२२।।
विः।भवेदिति वाक्यशेषः।एतदुक्तं भवति।अमावास्यायां पर्वर्क्षे चोदनाभावात्ततः परं पंचद
शांशं पत्तदपेक्षयोपवसथादि प्रयत्तिः पूर्वैश्चेयादि तिथिनिष्ठां निःपत्तिं गतो रविः तद्दिवस
स्य पर्वर्क्षभागकल्पनाएवंथा एवं तु।।२१।।विषुवमिति।विषुवंतं द्विरभ्यस्तं तदेव तिथिं द्वैविध्यमु
क्तं तद्विषुवत्संज्ञकमुक्तं।दिवससंज्ञकमुक्तं तदेव सार्धे यात तदेव परिमाणं चतुर्दश रूपोनमेको
नेन त्रयोदशकं।तावन्मात्रं दिनद्वयं षड्गुणीकृतं द्वादशगुणेन यादिना निपक्षः।असावार्क्ष १२

एवन चार्द्धः अतएव मतोपदेनं ततः रूपोनं।अध्यर्धमध्ये तिथेः स विषुवान्स्मृतः।तिथिदिना
नां तु चंद्रमस एव न सौरः पक्षः।वास्यांकारान्तिपदुक्तं।तदेव सूनां कमतिपादितं वक्ष्यमाणेन संख्यो
पयोग्यं तस्मात्कलाभिर्नाडीभिर्निर्कोष्यति स्तस्मात्वन्यथा लघुत्वेनाह।।२२।।पलानीति।पंचा
शत्पांपलान्युदकस्य धान्यपक्वा द्वानि तस्मिन्परिमाणे तान्त्रयदेतत् आढकं नाम प्रमाणं।द्रोणमत
स्तेन प्रमाणेन प्रमेयं प्रमातव्यं।तदपि प्रमाणं पंचशतद्वय प्रमाणं २००।तदेव पश्चात्त्रिभिर्विहीनं
पलानि पंचाशदपां धृतानि तदाढकं द्रोणमतः प्रमेयं।त्रिभिर्विहीनं कुडवैस्तु कार्यं तन्नाडिका
यास्तु भवेत्प्रमाणं।।२३।। ।।कुडवैस्तु कार्यं।कुरुकुडवरूप्रगुला माल्लाका।तया।यावच्छिद्रं
तेन ततः छिद्रोदक प्रस्त्रसायावन्मात्रः कालोपगच्छति तत्कालिकाया घटिकायाः प्रमाणं भवेत्।
सा नाडी भवतीत्यर्थः।।२३।।तत्प्रसंगादुक्ता।अत्र यागकालविधिविशेषमाह।एकादशाभिरि
ति।पर्वाणीति।तदर्थाः नतद्वयपवाः कलासमूहा येष्टकाः कार्याः इत्युक्ताः।षोडशाया चतुर्विं
शतिर्द्वात्रिंशद्विचतुरंशानेकादशाभिरभ्यस्य।संगुण्य।षोडशानां षट्सप्तसप्तधिकं शतं।१
७६ भवति।चतुर्विंशतेः शतद्वयं चतुःषष्टिः।२६४ द्वात्रिंशतः शतत्रयं द्विपंचाशच्च।३५२त

13

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वे॰ज्यो॰भा॰ १३

थानवभिस्तिथिं। तिथ्यवयवानपि नवभिरभ्यस्ते चसमानामंकानां षट्पंचाशत् ५६ भवंतिता
नवभिरभ्यस्य त्रातपंचकं च त्वारश्च ५०४ ताएकीकृत्य शतत्रये त्रहापंचाशता च सहाष्टकं षट्
पंचाशच्च भवंति। ८५६ तेषां युगलब्धं। युगाह्रादृशेह्र। युगोपन्यासप्राधान्यात्। तेस्ततोभागमप
हृत्य यल्लब्धं। एकसप्ततिकं। ७१ सपर्वस्यात्। चतुरंशस्यादितिशेषः। एवं त्र्यंशावयवैश्चतुःषष्ट्य
धिकेन त्रातद्वयेन सहाष्टषष्ट्यधिकं त्रातसप्तकं ७६८ तस्यतथैव भागापहारः। लब्धं चतुःषष्टिः ६४
तथैव द्व्यंत्रास्य त्रातषट्कमशीतिश्च लब्धं। तथैतत्षट्पंचाशत्। ५६ कृत्स्नेर्वाकं ते विषपर्वकालइत्या

एकादशाभिरभ्यस्य पर्वाणि नवभिस्तिथिं। युगलब्धं सपर्वस्याद्वर्तमानार्कभक्रमात्॥२४॥

ह। वर्त्तमानार्कभक्रमात्। यस्मिन्नक्षे अर्कआस्ते तत उत्तरः काल इत्यर्थः। एषएव यागकालः। औ
पवस्ते तु पूर्वोक्त एव। अथवैतमेवार्थमन्यति तिथिं त्रिंशत्संख्याकं नवभिर्गुणयेत्। तथा तदापंचाश
त्चत्वारिंशत् एकोनचत्वारिंशत्कला। एकोनविंशतिरुद्धपंकृत्वा। एवमेतयोः कालयो[illegible]ह
पक्रमोपसंहारौ यथाभवतस्तथा वर्त्तितव्यं। तमभ्युदिते शिपथिकृती स्वामी प्रक्रांते वेदनिपत्ति
विद्धस्यादिति श्रुतेश्च। एतद्माघास्यामधिकृत्योक्तेस्य भेदेन परिमाणमाह। सूर्यर्क्षभागा १३

न्नवभिर्विभज्येति। यस्मिन्नक्षत्रे सूर्यस्थितः सूर्यर्क्षभागा ह्युक्ताभागा नुक्तानष्टसंख्याका
न्। अस्य यावंतः तान्नवभिर्विभज्य भागं हृत्वा ततः शेषं द्विरभ्यस्य द्विगुणीकृत्य। षोडशानां न
वधा स्यस्य। सप्तांशा अवशिष्यंते। तद्विगुणाश्चतुर्दश भवंति। चतुर्विंशतेर्द्वौ नवकावष्टास्त्राया
सषट्। अवशिष्यंते। तद्विगुणा द्वादश भवंति। तथा द्वात्रिंशतस्त्रीन्नवकान्। सप्तविंशतिं २७।
पास्य पंचशिष्यंते। ते द्विगुणा दश भवंति। ततः सादिनोपभुक्तिः सूर्यस्येति वाक्यशेषः। कथंशेषं
तथैव विभज्येति वर्त्तते। एतदुक्तं भवति। द्व्यंशस्य द्व्यंशकलनया त्र्यंशस्य त्र्यंशश्चतुरंशस्य चतुरं
शाएव भागः दिनकालपरिमाणमाह। तिथियुक्ताभुक्तिर्दिनेषु कलाः। तिथियुक्तासप्तगुणास
षट्पंचाशत्परिमाणभुक्तिः। साच भुक्तिः सहिताद्वाभ्यां त्रिभिश्चतुर्भिर्वा सहिताअष्टपंचा
शत् ५८ एकोनषष्टिः ५९ षष्टिः ६० ताभागानां सकलया दिनेषु सकलोसकलाभवतीति वाक्य
शेषः। एवं तु सकलपरिमाणमहर्दिने नैकादशकेनतदुक्तं। एकादशाभिर्दिवसैः सूर्यर्क्षे आप्नोती
त्यर्थः। एवमेतयोगे सज्ञावेवं चंद्रस्यापि वार्यमिति वाक्यशेषः॥२५॥ संप्रति कालपरिमाणमाह। त्रं
शीति। तद्वद्वेर्दुर्भर्येद्दितिशेषः। तत्परिमाणं त्र्यंशः। तत्परिमाणमशीतथा दिवसचोदनाः। समंतु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णाःषट्पंचाशत्परिमाणंतत्संख्याकांतिथिंकिंसमग्रंमंशीभशेषंदिवसांशभागंचतुर्दशावाप्य
पनीयतेसैकत्वंमाशुक्ततथाकल्पनयानयकैर्भिन्नाद्यात्।नेतुद्ध्यंशापेक्षयापंचषट्सप्तधाभवे
तितत्तथादिवसांगभागचतुर्दशावाप्येनीयत्पष्ठानामधेयंचत्वारएवंषट्पंचाशतस्तान्नवकाद्दावे
कादशावापास्यसप्तचत्वारिंशत्४७षड्चत्वारिंशत्पंचचत्वारिंशत्।द्यधस्त्रिष्वंते।तेषामाद्योअंशा
अष्टौतथोपरिष्टात्स्युःपरांशस्तेष्वष्टौ।एवमर्कयुगेकषष्टिर्द्विषष्टिस्त्रिषष्टिर्वानक्षत्रापेक्षयाभव
ति।एतत्तद्यार्क्षसौरंसौमसयस्मिंस्तिथिकल्पनायामिहप्रमाणं।नक्षत्रापेक्षयाक्विमेवंभवतीति
अंशीभशेषोदिवसांशभागश्चतुर्दशस्याद्यनीयभिन्नं।भार्धेऽधिकेचापिगतेपरेंशोद्वावुत्तमे
तत्रवर्केखेयुः॥२५॥ ॥नास्तत्रीभुक्तिःनभेगतेनभनस्यत्रेतीति।अधिकेचकालेवासतितत्र
किंपरांशोभवेदितिवाक्यशेषः।किंसर्वकालोनाद्यवन्तएव।कालगत्यपेक्षयापरापश्चिमेद्वौपंचा
शौभवतः।एवमेतस्याकलनामाग्रहगणितंतद्गुणितसापेक्षत्वान्नपर्यालोचितंतांतुगणितज्ञाः
स्फुटतरांकल्पयिष्यंति।तेषांत्वागमप्रतिपन्नमेपदार्थस्यैवकेवलस्यनिपुणंप्रतिपादितं॥२५॥ए
वमेतत्पूर्णमासस्यदाभ्यस्यचंद्रसूर्यसंबंधेनपर्वसंबोदनयाथागकालंप्रतिपाद्य।अथयथानांसं १४

ख्यातेनकालानिष्पत्तिप्रतिपत्त्यर्थमाह।त्रिंशत्यन्हामिति।त्र्याणांशतानांसमाहारस्त्रिशती
यावद्षष्ट्यधिकानित्रीणिशतानीत्युक्तंभवति।नतन्तुकिं।तद्वोवर्षमितिभवतीतिवाक्यशेषः
सपंचवर्त्तवःपंचचर्त्तवइतिश्रुतिमभिप्रेत्य।निरुक्तकृत्पंचर्त्तवश्चेत्याह।तथातस्य।अयनेद्वेउदक्
दक्षिणेइति।तस्यतेतयोर्मासाद्वादशाभवंतीतिवाक्यशेषः।तेषुतुसर्पास्तत्पंक्तिकेद्वादशास्तुर्मास
विभागेद्वादशादित्याइतिश्रुतेः।ब्रह्मवाएषऋतयतिपद्संतर्ग्याद्याविभागचोदना।एवमेतत्सम
ग्रमेकीभूतंपंचगुणंयुगं।युगाध्यक्षमितिस्यादेद्युगमधिकृततंत्स्यैषान्नतीतिनकृतादीनां।एतेतु
त्रिंशत्यन्हांसषट्षष्टिरब्दःपंचर्त्तवोयने।मासाद्वादशसूर्याःस्युरेतत्पंचगुणंयुगं॥२६॥उदग्वां
वासवस्यस्युर्दिनराशिस्स्वपंचकः॥क्षयेर्द्विषष्टिहीनंस्यात्त्रिंशत्साचैकपास्त्तएणं॥२७॥ ॥
द्वादशपूर्वमिथकृतास्तत्प्राधान्येन।अंशादिमयन्तिस्तत्स्यदिनानि॥२८॥उदग्वामिति।वासववर्द्धःत
त्संबंधेनयत्तदितिश्रुतेः।सवनानांप्रातरादीनांसंबंधात्सवनस्यप्राधान्यात्तस्यनिर्देशः।तदीयमान
स्यप्रमाणमुदगाएवंतेस्युर्भवेयुः।तेतुसूर्यस्यनाम्नेषां।यथाहपरिशिष्टकृत्।सातिथिस्तदहोरात्रंय
स्मादभ्युदितोरविः।तथाकर्माणिकुर्वीततह्रासवद्धीनकारणमिति।एवंसमानोदिनरात्रिर्भवेदितिवा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कयच्छेषः।तथास्वपंचकः।कषेश्चंद्रस्य ऋषिर्धिष्ण्याणामितिवर्णलिंगात्।तस्यस्वनामनियतः पंचकः
।त्रिपंचकइतिवापाठः।तदापक्षएवयेर्वृद्धिः षष्टिहीनंस्यात्स्याःप्रसेकस्यापितिथेर्द्युषष्टिभागोहीय
ते।तथाचगर्गः।द्विलवोनमहोरात्रंचंद्रस्यगतिरुत्तमेति।सएषतिथिर्विज्ञासार्धेकपास्तएणांस्त
मा णांमसा[illegible]णांकृशास्त भिरितिनक्षत्राणामितिनेरुक्तः।तेषामेकविंशत्याहीनंस्यादितिवर्त्तते।तास्त
कलाएवस्त्रीलिंगनिर्देशात्।तथाचगर्गः।दिनरात्रिपुषःपक्षःपादत्र्यध्यात्वरेद्युभिः।वरांशाममितैरं
शैरेकविंशतिभिर्द्दिनैरिति।एवमेतानिमयापूर्वमेवगर्गवाक्यैर्विस्तरेण प्रतिपादितानि।इहार्थ
पंचत्रिंशंशतंपौष्णमेकोनमयनान्यषेः।पर्वणांस्याच्चतुःपादीकाष्ठानांचैवताःकलाः॥२८॥
मितनैतदुराहृतं।एवमेतद्युगस्य॥२७॥पंचत्रिंशमिति।यत्पौष्णंसौरमयनमुदगयनाद्युक्तंतद
येश्चंद्रस्ययुगेसमुस्यायनानिपंचत्रिंशंशतमेकोनचतुस्त्रिंशं भवतीतिवाक्यशेषः।चंद्रमासा
पेक्षयाप्रतिमासंद्वेद्वेस्येतत्।चांद्रमासाःसप्तषष्टिस्तत्रभवति।पर्वणांचतुष्पादीपक्षास्त्रिंश
नुसेकिकेस्फक्तं।तेषांचतुष्पादीचत्वारःपादाः।चतुर्विंशंशतमित्यर्थः।केषांपर्वणांसर्वसमा
नां।यस्मादधिकमासाभ्यांसह।तत्रतत्रद्वाषष्टिर्मासाः।तस्मादेतेषांतत्रसमस्तसंख्याप्रसं १५

गादाह।काष्ठानांचैवताःकलाःकाष्ठापंचाक्षराभवेदितिवक्ष्यति।तासांचतुष्पादीचकलानि
ष्पत्तिरित्यर्थः।चतुर्विंशंकाष्ठाशतंकलाभवतीत्यर्थः।एवंसंख्यामाह॥२८॥सावनेंदुरिति।
मासानांयुगसंख्यासावनसंख्यातस्येपस्यासौराणांषष्टिरेवत्रिंशद्दिवससमासंख्या।यःषष्टिः
सैकाएकषष्टिः।६१।तथाधिकमासाभ्यांसहद्विषष्टिः।६२।तथामासिकेचांद्राणांसप्तषष्टिरि
त्यर्थः।सतुमासः।सर्वेषांद्विद्युत्रिंशत्युरहर्भामित्रिंशद्दिनंमासइत्यर्थः।तथासावनस्यदिनस्य
सावनेंदुस्त्रिमासानांषष्टिःसैकाद्विसप्तिका।द्युत्रिंशत्सावनस्यार्धंसूर्यस्त्रीणांसपर्ययः॥
२९॥अग्निःप्रजापतिःसोमोरुद्रोऽदितिर्बृहस्पतिः।सर्पाश्चपितरश्चैवभगश्चैवार्यमापिच॥३०॥
सविताष्टाथवायुश्चेंद्राग्नीमित्रएवच।इंद्रोनिर्ऋतिरापोवैविश्वेदेवास्तथैवच॥३१॥
विष्णुर्वसवोवरुणोजएकपात्तथैवच।अहिर्बुध्न्यस्तथापूषाश्विनौयमएवच॥३२॥
त्रिंशदेवार्धनाडिकाइतिवाक्यशेषः।सूर्यस्यविपर्ययः।पराद्यंतिर्दिनं।तथास्त्रीणां।नक्षत्रा
णांचपरावृत्तिरेवस्वकंदिनमित्युक्तंभवति॥२९॥नक्षत्रदेवताआह।अग्निरिति।प्रसिद्धा
एतादेवताः।रुद्रस्यप्रतीतिरूपःसोमःप्रोष्ठपदयोःविपर्ययःपाठदोषोवा॥३०॥३१॥३२॥

18

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वे॰ज्यो॰भा॰ नक्षत्रदेवताइति। एतासांप्रयोजनंयस्माच्छास्त्रज्ञैस्तंत्रकारैर्बव्हृचानां। सत्कृथार्कैर्यजमा
१६ ननामनीतिद्वितीयंनोमनक्षत्रंस्मृतमुदाहृतं। यज्ञकर्मणिनस्मादेताउदाहृताः॥३३॥उग्राणी
ति। नक्षत्रस्वरूपज्ञानस्तयनंयती। तार्थःश्लोकः॥३४॥ संक्षेपार्थमाह। द्युनमिति। तत्रयुगमध्ये।
आहार्यतेत्र। द्यावधिमासकौयत्कृतावुपजायेते। ययाकल्पनयाभवतः। तदर्थंहेयमपदानर्थं।
नक्षत्रदेवताएताएताभिर्यज्ञकर्मणि। यजमानस्यशास्त्रज्ञैर्नामनक्षत्रजंस्मृतं॥३३॥
उग्राण्यार्द्राचचित्राचविशाखाश्रवणाश्वयुक्। क्रूराणितुमघास्वातीज्येष्ठामूलंयमस्यभं॥
३४॥ द्युनंषष्टिद्विभागेनहेयंसौरंसपार्वणं। यत्कृतावुपजायेतेमध्येतेचाधिमासकौ॥३५॥
कुतोयपर्वमितिवाक्यशेषः। किंकेवलंनसपार्वणं। पार्वणनक्षत्रसहितमित्यर्थः। इतरेह्निमासे
चैत्यनियमे। एतदेवार्थंउत्तरसौम्याविष्णवजानांपरतो द्वौद्वौएवंमासोपलक्षके। अतएवेह न
समसंख्यायाः सर्वाणिकालसाम्यमभिप्रेत्ययंचवार्षिकयुगे। उदाहृतानि। पर्वविभागार्थंकु
तोहेयंसर्वात्मनइतिवाक्यशेषः। किमेकदेशो द्युनंद्विषष्टिभागेनप्रत्येकंदिनंद्वाषष्टेनभागे
नकृत्वेतिवाक्यशेषः। एतदर्थमेवोक्तं तुहेयंपर्वचेत्याहइति। तथाचगर्गः। ततःप्रक्षीयमाणस्य १६

तिथिरित्येषसंज्ञिता। द्विलवोनमहोरात्रंचंद्रस्यगतिरुत्तमेति। तथा। द्विलवक्षयसंभूतो द्वाषष्ट्याभ
वतेतिथिः। कृतोरंतमनुमाप्यहीनरात्रेतिनामचेति॥३५॥ कालळक्षणमाह। कलादशेति। नाःक
लाइति। उक्तास्तास्त्वाकळाविंशभागसहितानाडिकेतिवाक्यशेषः। द्विमुहूर्तस्यनाडिकेभवतइति
वाक्यशेषः। मुहूर्तस्तुनाडिकेइतिगर्गः। तेमुहूर्ताद्वित्रिंशत्। रात्रिंत्रामुहूर्ताः। दिनंतत्रकळानांष
ट्शतीअधिकाभवेत्। ऋतुराणिषट्शतानि। कळानांदिनमित्यर्थः। एतदेव॥३६॥ ससमकुंभयुक्तो
कलादशसविंशास्याद्द्विमुहूर्तस्तुनाडिके। द्युत्रिंशत्तत्कलानांतुषट्शती त्वधिकाभवेत्॥३६॥
ससमकुंभयुक्सोमः स्यपोदयूनित्रयोदश॥उत्तमानितुपंचाब्दःकाष्ठापंचाक्षराभवेत्॥३७॥ ॥
मइति। ससोमः कृतोभयुकनक्षत्रसमाहितः ससमकंसमांशसंख्याकंदिनंतुभुक्तइतिवाक्यशेषः
तथास्यपोदयूनित्रयोदश। सौरंदिनंत्रयोदशांशरहितमित्यर्थः। अथवादिनैकादशाकेनतद्गमिति
यदुक्तं। तस्यभागेनेदंशापनेनदिनानित्रयोदशभवंति। स्यपर्श्चाभुक्तो। मयोत्तमानिपंचाब्दः। आर्क्ष
चांद्रमानतोयास्तूत्तमानिमानांतराणितेष्वासामोनामिच्छनाडिकाषट्‌श्वकाश्चषड्भवंतितानि
पंचघटिकास्त्रिंशत्साधाः एवंराशिनः त्रयोदश। साधआर्क्षभुक्तिरित्युक्तंभवति। तान्येवस्

17

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वे॰ज्यो॰भा॰ स्त्रएणंनक्षत्राणंचरितंगतागतं।तद्विज्ञानंयोजानातिसोश्नुते।प्राप्नोति।किंसोमसूर्यनक्षत्र
१८ चरितंलोकंतत्सायुज्यमित्यर्थः।तथेहलोकेचसंततमनवच्छिन्नंसंतानसिद्धं।स्वर्गलोकेथा
न्प्रजावान्भवतीत्यर्थः।अभ्यासःशास्त्रनिष्पत्तयेसत्त्वपक्षमासतिथिचंद्रगतिज्ञानादालिंप्य
योभ्यस्याच्चपंक्तिपावनमेवच।एतत्तुविरुद्धसंवत्सराणांतिथिज्ञानफलंयथाभिमानिनांवस
र्तज्ञानांयथोपदेशिनांयथानुष्ठानप्रवर्तकानां।अकालप्रयोगकालत्वोदनामकालप्रयोगप्रवर्त्त।
फल्यादोषमन्वावाहिधन्मूर्द्धपातादिदोषपरंपरानपितत्र्यैरश्रुजीवतीत्यश्राद्धीपरवं।तथाप्र
सोमसूर्यस्तृचरितंविद्वान्वेदविद्श्नुते।सोमसूर्यस्त्रिचरितंलोकंलोकेचसंततमिति।४१।
।इतिवेदांगज्योतिषं।। ।७।। ।दोषज्ञानफलोच्चपरत्राप्यसिद्धिः।तथाचस्मृतिः।दुरिष्टैर्दुर
धीतैश्चदुराचारैर्दुरागमैः।।विप्राणांकर्मदोषैस्तैःप्रजानांजायतेभयमिति।तस्मात्तथाभागकर्म।
णिवर्तितव्यं।यथोपक्रमापवर्गाबुभावपिनतत्पतः।अभ्युदितेष्टिदर्शनात्कालोपक्रमदोषः।तथा
पुराहायत्राःपुरादीक्षितापद्यस्त्राणामितियदंतेनाधीयेतेतिश्रुतिः।तदेतदेवार्थमभिप्रेत्यसूत्रका
रः।पौर्णमासीमुपवसत्स्वर्गनेमावास्यायामिसाह।तथाचश्रुतिः।यएवासावाग्नेयोष्टाकपालः १८

पौर्णमासेयोमावास्यायामग्नयेपथिकृतेकुर्यादिति।तस्मात्कालउपक्रमापवर्गयोरेवैते
।अपार्थकेभवतस्तस्माद्विचार्यंपततस्तत्वेन्दुराभ्यपत्ताअनक्षत्रायत्किंचाकुर्वततांक्रतुसामेधा
कुर्वतेतिश्रुतेः।तस्माद्भयफालानुरोधवशादेकांगवैकल्यमपिचशास्त्रदोषप्रदत्तिद्वेषाम
भिमेतापरिशिष्टवाक्यानुरोधवशात्।चतुर्दश्यवसानेनुपितव्यस्तुकारयेदितियाज्ञ्यैयागि
त्तत्रकर्तव्यस्यपेक्षमेव।तथाचगर्गः।चतुर्दशांपदाकृष्णेक्षयमभ्येतिचंद्रमाः।दर्शोभवति
वाप्यूर्ध्वःसिनीवाल्यस्ततस्तदा।निरस्तुऊतोथवाप्युपगच्छतिततःपूर्णेप्सितोह्यंतत्कार्यंचंद्र
बभ्राद्रुदेवृद्धिः।यद्यप्येवंतथायएवासावाग्नेयोष्टाकपालइति।तस्मात्श्रुतेस्तद्गौणत्वमेवप्रतीय
ते।अन्यथैषांश्रुतिरेवनस्यात्।येषांतुसूत्रकारोविकल्पेनाह।पूर्वांपौर्णमासीमुत्तरांचेदि
त्सादि।कात्यायनसूत्रापेक्षावशेनतेच्छयामवृत्तिरिहतुसूत्रकारस्यप्रवर्तितेतृप्रतिज्ञा
पूर्णिमत्साधानतस्मादेवमत्रतरांविचार्यमिसुक्तमेतत्सफलंविहितोयागात्फलंप्राप्तुमुख्योदितंप
त्।निर्मत्सरःश्रौतकर्मप्रयत्नात्दोषान्बहून्मानुसुरथान्यो।मयाकृतंभाष्यमस्यस्तुबुध्याय
स्मान्नातमागमनंपृच्छमानंतस्मात्क्षेपंतद्विदःक्षम्यंतुममतेभ्योव्रजस्तसूर्यैरनुभेभ्यः।सोमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

18

K K S U LIBRARY
RAMTEK
441 106
M-1332
Dist Nagpur

वे·ज्यो·भा· कारोपेरविदुक्तकांतमातिभट्टानागमभावबुद्धिः।ज्योतिःशास्त्रंनाकुलकेनसंसाजिव्हास
१९ र्चमात्मनाप्रव्रजिष्यन्॥इतिशेषकृतंज्योतिःशास्त्रभाष्यंसमाप्तं॥७॥शाके१७८७बहुधा
न्यनामाब्देतपोमासिसितपक्षेगुरुतिथौजैवात्रकघस्रेसरवारामयायजूरुस्तुबालकृष्णो
नज्योतिर्भाष्यंलिखीकृतम्॥१॥७॥ ।।।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=23.10.20 15:27
,TRANSFERRED=2020/10/23 at 15:30:50
,PAGES=19
,TYPE=STD
,NAME=S0004497
,Book Name=M-1332-VEDANG JYOTISH BHASYA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection